International Journal of Multi Research

**Online ISSN:** 3107 - 7676
IJMR 2026; 2(1): 26-28
**2026 January - February**
www.allmultiresearchjournal.com

Received: 28-10-2025
Accepted: 22-11-2025
Published: 03-01-2026
**Doi:** https://doi.org/10.54660/IJMR.2026.2.1.26-28

# भारतदेशे पुराण प्रसिद्धानि तीर्थानि

**Dr. Padmavati M Singari [1*], Shreenidhi A [2]**
[1] Ph.D., Assistant Professor and Co-Ordinator, P.G Department of Studies in Sanskrit Karnatak University, Dharawad, Karnataka, India
[2] Research Scholar, P.G Department of Studies in Sanskrit, Karnatak University Dharawad, Karnataka, India

Corresponding Author; **Dr. Padmavati M Singari**

## सारांश
महाभारतस्य खिलभागत्वेन प्रसिद्धः तथा पुराणनाम्नापि ख्यातः ग्रन्थः हरिवंशः । कृष्णावतारकथाः विस्तृततया अत्र वर्णिताः सन्ति । भागवते-भारते याः कथाः न उल्लिखिताः तेषामपि अत्र कथनं दृश्यते । तथा च पुराणसदृशोयं ग्रन्थः । अस्मिन् हरिवंशे विंशदाधिकानि स्तोत्राणि सन्दृश्यन्ते । तेषु अनेकेषां देवतानां स्तुतिः वर्तते । तेषु स्तोत्रेषु आर्यास्तुतिः इति एकं स्तोत्रम् प्रसिद्धम् अस्ति । तत्र भारतस्य नानातीर्थानाम् उल्लेखं पश्यामः । तथा च तीर्थपरिचयः अत्र उद्देशः ।

**कूट शब्द :** तीर्थशब्दस्य व्युत्पत्तिप्रदर्शनम्, तीर्थानां परिचयः, तीर्थानि कस्मिन् राज्ये वा आधुनिककाले कुत्र सन्ति इत्यस्य संशोधनम्, तीर्थानां महत्वप्रतिपादनम् तीर्थानां सन्दर्शनेन सामान्यानां कथं प्रयोजनम् इत्यस्य प्रतिपादनम्

### प्रस्तावना
नानायोनिषु मानवयोनौ जन्म प्राप्य अस्माभिः किं कृतम् किमकृतम् इति यदि पश्यामः तदा पुण्य-पापादीनां विचारः मनसि उत्पन्नः भवति । पुण्यसङ्ग्रहणं कथं कार्यं इति शास्त्रादीनां अवलोकनं कृतं चेत् तदा ज्ञायते यत् पूजा-दान-इज्या-तीर्थसन्दर्शनम् इत्यादि । तथा च किं नाम तीर्थं इति चेत् यत् अस्मान् पुनाति तदेव तीर्थमिति ।

तरति पापादिकं यस्मात् वा यत्र निमज्जनं क्रियते तेनैव जन्मजन्मातराणि पापानि परिहरन्ति इत्रि धिया तीर्थानि पापनाशकानि तथा मोक्षादि पुरुषार्थप्रदाणि इति वयं जानीमः । तथा च सर्वैः स्वजीवितावधौ यावन्ति तीर्थानि दृष्टुं शक्यानि भवन्ति तावन्ति नियमेन सन्दर्शनं कृत्वा आत्मानं पवित्रं वा पापैः मुक्तमिति मन्यन्ते ।

तेषु तीर्थेषु भारतदेशे एव शताधिकाः तीर्थाः प्रसिद्धाः सन्ति। केचन अत्र स्तोत्रे उल्लिखिताः सन्ति । तेषां विस्तृतपरिचयः अत्र यथामति मया क्रियते ।

### ॥ आर्यास्तुति : ॥
प्रभासं च प्रयागं च नैमिषं पुष्कराणि च ॥३०॥

गङ्गातीर्थं कुरुक्षेत्रं श्रीकण्ठं गौतमाश्रमम् ।
रामह्रदं विनशनं रामतीर्थं तथैव च ॥३१॥
गङ्गाद्वारं कनखलं सोमो वै यत्र चोत्थितः ।
कपालमोचनं तीर्थं जम्बूमार्गं च विश्रुतम् ॥३२॥
सुवर्णविन्दुं विख्यातं तथा कनकपिङ्गलम् ।
दशाश्वमेधिकं चैव पुण्याश्रमविभूषितम् ॥३३॥
बदरी चैव विख्याता नरनारायणाश्रमः ।
विख्यातं फल्गुतीर्थं च तीर्थं चन्द्रवटं तथा ॥३४॥
कोकामुखं पुण्यतमं गङ्गासागरमेव च ।
मगधेषु तपोदश्च गङ्गोद्भेदश्च विश्रुतः ॥३५॥
तीर्थान्येतानि पुण्यानि सेवितानि महर्षिभिः ।
मां प्लावयन्तु सलिलैः यानि मे कीर्तितानि वै ॥३६॥
सूकरं योगमार्गं च श्वेतद्वीपं तथैव च ।
ब्रह्मतीर्थं रामतीर्थं वाजिमेधशतोपमम् ॥३७॥
धारासम्पातसंयुक्ता गङ्गा किल्बिशनाशिनी ।
गङ्गा वैकुण्ठकेदारं सूकरोद्भेदनं परम्।
तच्छापमोचनं तीर्थं पुनन्त्वेतानि किल्बिषात् ॥३८॥

भागवते तीर्थप्रवरमिति कीर्तितम् प्रसिद्धं प्रभासक्षेत्रम्, गङ्गा-यमुना-सरस्वत्योः त्रिवेणी सङ्गमस्थानम् प्रयागम्, अनिमेषाः यत्र दीर्घं तपः चकार तादृशं नैमिषारण्यम्, ब्रह्मणा यत्र सरः निर्मितः सः पुष्करः, गङ्गातीर्थम्, यत्र कुरु-पाण्डवानां महासङ्ग्रामम् अभवत् तथा यत्र सरस्वती-दृषद्वती नद्योः सङ्गमः, यत्र परशुरामः क्षत्रियाणां रक्तेन पञ्च सरः निर्मितवान्, स्वायम्भुव मनोः काले ब्रह्मावर्तमिति यस्य नाम आसीत् तादृशं पवित्रं कुरुक्षेत्रम्, हस्तिनापुरस्य उत्तरपश्चिमे विद्यमानम् एकम् तीर्थक्षेत्रम्, न्यायदर्शनकारस्य गौतमस्य तपोभूमिः गौतमाश्रमम्, विपाशा नद्याः तटे विद्यमानम् रामहृदम्, हस्तिनापुरस्य समीपवर्ति एकं क्षेत्रम्, रामतीर्थम्, गङ्गाद्वारमिति ख्यातं हरिद्वारक्षेत्रम्, सोमस्य उत्पत्तिस्थलं कनखलतीर्थम्, शिवस्य हस्तधृतानि कपालानि यत्र मोक्षं प्राप्तानि तादृशं कपालमोचनतीर्थम्, लोके सुविख्यातं पुष्करस्थ तीर्थेषु अन्यतमं जम्बूमार्गम्, ख्यातं सुवर्णविन्दुतीर्थम्, कनकपिङ्गलतीर्थम्, पवित्रैः आश्रमैः काश्यां विभूषितं दशाश्वमेधतीर्थम्, बदर्यां प्रसिद्धं बदरीतीर्थम्, नरनारायणौ यत्र तपश्चकार तादृशभूमिः नरनारायणाश्रमम्, फल्गुतीर्थम्, चन्द्रवटतीर्थम्, पूर्वस्मरणं यत्र भवति तादृशं परमपवित्रं कोकामुखक्षेत्रम्, गङ्गासागरम्, मगधदेशे प्रसिद्धं तपोदतीर्थम्, गङ्गोद्भेदतीर्थम् इति । एतानि पुण्यतीर्थानि महर्षिभिः सेवितानि । मया अधुना स्तूयमानानि तानि सर्वाणि तेषां शुभजलेन मां धौतं कुर्वन्तु। सूकरतीर्थम्, योगमार्गम्, श्वेतद्वीपः, ब्रह्मतीर्थम्, अवगाहनस्नानिनां जनानां शताश्वमेधयज्ञस्य फलदातारं रामतीर्थम्, धारारूपेण पतन्ती गङ्गानदी, पापनाशिनं गङ्गातीर्थम्, वैकुण्ठकेदारतीर्थम्, लोके श्रेष्ठं सूकरोद्भेदनतीर्थम्, सुप्रसिद्धं शापमोचनतीर्थम्, एतानि सर्वाणि तीर्थानि कीर्तयन्तं मां पापरहितं कुर्वन्तु ।

१. प्रभास= भारतस्य पश्चिमस्यां दिशि गुजरात् राज्यस्य समुद्रतीरे ऐतिहासिकं एतत् तीर्थं वर्तते । अत्रैव द्वादशज्योतिर्लिङ्गेषु एकस्य सोमनाथस्य मन्दिरं विद्यते । सोमनाथमण्डले एतत् अस्ति । हिरण्य-कपिला-सरस्वती नदीनां सङ्गमः अत्र भवति । अतः अयं सङ्गमक्षेत्रोपि । श्रीकृष्णः स्वस्य अवतारं अत्रैव समाप्तीकृतवान् इति भारते उल्लिखितम् । कृष्णस्य पादमूले पतितस्य बाणस्य नाम्ना एव प्रसिद्धं बाणतीर्थमपि अत्र विद्यते ।
२. प्रयाग= तीर्थराजमित्येव अयं प्रसिद्धः । गङ्गा-यमुना-सरस्वतीनां त्रिवेणीसङ्गमं अत्र भवति । अत्र स्नात्वा सर्वपापैः मुक्तो भूत्वा परं प्राप्नोति इति पुराणोक्तिः । ब्रह्मणा पूर्वं अत्रैव महायज्ञः आचरितः । जिनानुयायिनामपि अयं ऋषभनाथस्य सम्पर्केण पवित्रम् अस्ति । उत्तरप्रदेशे अयं विद्यते ।
३. नैमिषम्= उत्तरप्रदेशे सितापुरमण्डले गोमतीनद्याः तीरे विद्यमानं अत्यन्तं प्राचीनं तथा पवित्रं क्षेत्रम् नैमिषम् ।अष्टाशीतिसहस्र मुनिभिः अत्र तपः आचरितं इति पुराणानि कथयन्ति । अत्रैव विष्णुना सुदर्शनद्वारा निर्मितं चक्रतीर्थं तथा ललितादेव्याः मन्दिरं विद्यते । विष्णुः अत्रैव स्वयं अवतारं चकार । भगवान् बादरायणः अत्रैव पुराणानां उपन्यासं कृतवान् । पाण्डवाः अत्र द्वापरे वासं चक्रुः । शृङ्गि महर्षेः वृन्दावनं अत्र अस्ति ।
४. पुष्कर=राजस्थाने अज्मीर् समीपे वर्तते । अत्र ब्रह्मणः देवालयं विद्यते । अत्रैव उष्ट्राणां उत्सवः प्रचलति । पुष्करसरोवरे स्नात्वा जनाः मुक्तिभाजाः भवन्ति इति पुराणेषु उल्लिखितम् । अत एव अत्र बहुसंख्यया जनाः आगच्छन्ति । द्वादशवर्षेषु एकदा अत्र कुम्भमेळम् प्रचलति । तदा कोट्यधिकाः जनाः अत्र आगत्य स्नानं कुर्वन्ति ।

एवमादि पञ्चाशदधिकानां तीर्थानां उल्लेखः अत्र स्तोत्रे कृतमस्ति । तेषां समेषां परिचयार्थं हरिवंशस्य अध्ययनं प्रयोजकं भवति । हरिवंशपुराणे कथाः-तीर्थानि-पर्वताः-नद्यः इति अस्य भारतदेशस्य सर्वविधपरिचयः अस्माकं संस्कृतेः ज्ञानं भवति ।

तथा च ममायं प्रबन्ध: तीर्थानाम् अधिकाध्ययनाय उपयुक्तं भवेत् इति आशासे ।

## References


1. Jvālāprasād Śāstrī. Harivaṃśa Purāṇa. Poojabooks; 2020.
2. Narayanan. Kṣetra Caitañya Rahasyam. Kozhikode: Kṣetra Saṃrakṣaṇa Samiti; 2011.
3. Bhaduri NP. Purāṇakośa. Sahitya Samsad; 2024.



**How to Cite This Article**
Padmavati MS, Shreenidhi A. भारतदेशे पुराण प्रसिद्धानि तीर्थानि. International Journal of Multi Research. 2026; 2(1): 26-28.



**Creative Commons (CC) License**
This is an open access journal, and articles are distributed under the terms of the Creative Commons Attribution-NonCommercial-ShareAlike 4.0 International (CC BY-NC-SA 4.0) License, which allows others to remix, tweak, and build upon the work non-commercially, as long as appropriate credit is given and the new creations are licensed under the identical terms.